श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.21- चतुर्थ सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥

नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥

श्रीमद्भागवतमहापुराणम्

एकादशः स्कंधः

अथैकविं(म्)शोऽध्यायः

श्रीभगवानुवाच

य एतान् मत्पथो हित्वा, भक्तिज्ञानक्रियात्मकान् ।
क्षुद्रान् कामां(म्)श्चलैः(फ्) प्राणैर्- जुषन्तः(स्) सं(म्)सरन्ति ते ॥ 1॥

भक्तिज्ञा+ नक्रियात्+ मकान्

स्वे स्वेऽधिकारे या निष्ठा, स गुणः(फ्) परिकीर्तितः ।
विपर्ययस्तु दोषः(स्) स्या- दुभयोरेष निश्चयः ॥ 2॥

विपर्+ ययस्तु , दुभयो+ रेष

शुद्ध्यशुद्धी विधीयेते, समानेष्वपि वस्तुषु ।
द्रव्यस्य विचिकित्सार्थं(ङ्), गुणदोषौ शुभाशुभौ ॥ 3॥

समानेष्+ वपि, विचिकित्+ सार्थं(ङ्)

धर्मार्थं(वँ) व्यवहारार्थं(यँ), यात्रार्थमिति चानघ ।

दर्शितोऽयं(म्) मयाऽऽचारो, धर्ममुद्वहतां(न्) धुरम् ॥ 4॥

यात्रार्थ+ मिति, धर्ममुद्+ वहतां(न्)

भूम्यम्ब्वग्न्यनिलाकाशा, भूतानां(म्) पं(ञ्)च धातवः ।

आब्रह्मस्थावरादीनां(म्), शारीरा आत्मसं(यँ)युताः॥ 5॥

भूम्यम्+ ब्वग्न्य+ निला+ काशा,

आब्रह्मस्था+ वरा+ दीनां(म्)

वेदेन नामरूपाणि, विषमाणि समेष्वपि ।

धातुषूद्धव कल्प्यन्ते, एतेषां(म्) स्वार्थसिद्धये ॥ 6॥

धातुषूद्+ धव

देशकालादिभावानां(वँ), वस्तूनां(म्) मम सत्तम ।

गुणदोषौ विधीयेते, नियमार्थं(म्) हि कर्मणाम् ॥ 7॥

देशकाला+ दिभावानां(वँ)

अकृष्णसारो देशाना- मब्रह्मण्योऽशुचिर्भवेत्।

कृष्णसारोऽप्यसौवीर- कीकटासं(म्)स्कृतेरिणम् ॥8॥

मब्रह्मण्योऽ+ शुचिर्+ भवेत् ,

कृष्ण+ सारोऽप्य+ सौवीर, कीकटा+ सं(म्)स्कृते+ रिणम्

कर्मण्यो गुणवान् कालो, द्रव्यतः(स्) स्वत एव वा ।

यतो निवर्तते कर्म, स दोषोऽकर्मकः(स्) स्मृतः ॥ 9॥

दोषोऽ+ कर्मकः(स्)

द्रव्यस्य शुद्ध्यशुद्धी च, द्रव्येण वचनेन च ।

सं(म्)स्कारेणाथ कालेन, महत्त्वाल्पतयाथवा ॥ 10॥

शुद्ध्य+ शुद्धी, सं(म्)स्का+ रेणाथ,

महत्त्वाल्+ पत+ याथवा

शक्त्याशक्त्याथवा बुद्ध्या, समृद्ध्या च यदात्मने ।

अघं(ङ्) कुर्वन्ति हि यथा, देशावस्थानुसारतः ॥ 11॥

शक्त्या+ शक्त्या+ थवा,

देशा+ वस्था+ नुसारतः

धान्यदार्वस्थितन्तूनां(म्), रसतैजसचर्मणाम् ।

कालवाय्वग्निमृत्तोयैः(फ्), पार्थिवानां(यँ) युतायुतैः ॥ 12॥

धान्यदार्+ वस्थितन्+ तूनां(म्),

रसतै+ जसचर्+ मणाम् ,कालवाय्+ वग्नि+ मृत्तोयैः(फ्)

अमेध्यलिप्तं(यँ) यद् येन, गन्धं(लँ) लेपं(वँ) व्यपोहति ।

भजते प्रकृतिं(न्) तस्य, तच्छौचं(न्) तावदिष्यते ॥ 13॥

अमेध्य+ लिप्तं(यँ)

स्नानदानतपोऽवस्था- वीर्यसं(म्)स्कारकर्मभिः।

मत्स्मृत्या चात्मनः(श्) शौचं(म्), शुद्धः(ख्) कर्माचरेद् द्विजः ॥ 14॥

स्ना+ नदा+ नतपोऽ+ वस्था,

वीर्य+ सं(म्)स्का + रकर्मभिः

मन्त्रस्य च परिज्ञानं(ङ्), कर्मशुद्धिर्मदर्पणम् ।

धर्मः(स्) सम्पद्यते षड्भि- रधर्मस्तु विपर्ययः ॥ 15॥

कर्मशुद्धिर्+ मदर्पणम्

क्वचिद् गुणोऽपि दोषः(स्) स्याद् - दोषोऽपि विधिना गुणः ।

गुणदोषार्थनियमस्- तद्भिदामेव बाधते ॥ 16॥

गुण+ दोषार्थ+ नियमस् , तद्+ भिदा+ मेव

समानकर्माचरणं(म्), पतितानां(न्) न पातकम् ।

औत्पत्तिको गुणः(स्) सं(ङ्)गो, न शयानः(फ्) पतत्यधः ॥ 17॥

समा+ नकर्मा+ चरणं(म्)

यतो यतो निवर्तेत, विमुच्येत ततस्ततः ।

एष धर्मो नृणां(ङ्) क्षेमः(श्), शोकमोहभयापहः ॥ 18॥

शोकमोह+ भयापहः

विषयेषु गुणाध्यासात्- पुं(म्)सः(स्) सं(ङ्)गस्ततो भवेत् ।

सं(ङ्)गात्तत्र भवेत् कामः(ख्), कामादेव कलिर्नृणाम् ॥ 19॥

गुणा+ ध्यासात् ,सं(ङ्)गात्+ तत्र

कलेर्दुर्विषहः(ख्) क्रोधस् - तमस्तमनुवर्तते।

तमसा ग्रस्यते पुं(म्)सश्- चेतना व्यापिनी द्रुतम् ॥ 20॥

कलेर्+ दुर्+ विषहः(ख्),तमस्+ तमनु+ वर्तते

तया विरहितः(स्) साधो, जन्तुः(श्) शून्याय कल्पते ।

ततोऽस्य स्वार्थविभ्रं(म्)शो, मूर्च्छितस्य मृतस्य च ॥ 21॥

स्वार्थ+ विभ्रं(म्)शो

विषयाभिनिवेशेन, नात्मानं(वँ) वेद नापरम् ।

वृंक्षजीविकया जीवन्, व्यर्थं(म्) भस्त्रेव यः(श्) श्वसन् ॥ 22॥

विषया+ भिनिवे+ शेन, वृक्षजी+ विकया

फलश्रुतिरियं(न्) नृणां(न्), न श्रेयो रोचनं(म्) परम् ।

श्रेयोविवक्षया प्रोक्तं(यँ), यथा भैषज्यरोचनम् ॥ 23॥

फल+ श्रुतिरियं(न्),श्रेयो+ विवक्षया, भैषज्+ यरोचनम्

उत्पत्त्यैव हि कामेषु, प्राणेषु स्वजनेषु च ।

आसक्तमनसो मर्त्या, आत्मनोऽनर्थहेतुषु ॥ 24॥

उत्पत्+ त्यैव, आसक्त+ मनसो, आत्मनोऽ+ नर्थ+ हेतुषु

न तानविदुषः(स्) स्वार्थं(म्), भ्राम्यतो वृजिनाध्वनि ।

कथं(यँ) युञ्ज्यात् पुनस्तेषु, तां(म्)स्तमो विशतो बुधः ॥ 25॥

वृजिना+ ध्वनि

**एवं(वँ) व्यवसितं(ङ्) केचि- दविज्ञाय कुबुद्धयः।**

**फलश्रुतिं(ङ्) कुसुमितां(न्), न वेदज्ञा वदन्ति हि ॥ 26॥**

**कामिनः(ख्) कृपणा लुब्धाः(फ्), पुष्पेषु फलबुद्धयः ।**

**अग्निमुग्धा धूमतान्ताः(स्), स्वं(लँ) लोकं(न्) न विदन्ति ते ॥ 27॥**

**न ते मामं(ङ्)ग जानन्ति, हृदिस्थं(यँ) य इदं(यँ) यतः ।**

**उक्थशस्त्रा ह्यसुतृपो, यथा नीहारचक्षुषः ॥ 28॥**

नीहा+ रचक्षुषः

**ते मे मतमविज्ञाय, परोक्षं(वँ) विषयात्मकाः ।**

**हिं(म्)सायां(यँ) यदि रागः(स्) स्याद्, यज्ञ एव न चोदना ॥ 29॥**

मत+ मविज्ञाय

**हिं(म्)साविहारा ह्यालब्धैः(फ्), पशुभिः(स्) स्वसुखेच्छया ।**

**यजन्ते देवता यज्ञैः(फ्), पितृभूतपतीन् खलाः ॥ 30॥**

स्वसुखेच्+ छया, पितृभू+ तपतीन्

**स्वप्नोपमममुं(लँ) लोक- मसन्तं(म्) श्रवणप्रियम्।**

**आशिषो हृदि सं(ङ्)कल्प्य, त्यजन्त्यर्थान् यथा वणिक् ॥ 31॥**

स्वप्नो+ पम+ ममुं(लँ),त्यजन्+ त्यर्थान्

**रजः(स्)सत्त्वतमोनिष्ठा, रजः(स्)सत्त्वतमोजुषः।**

**उपासत इन्द्रमुख्यान्, देवादीन् न तथैव माम् ॥ 32॥**

रजः(स्)सत्त्व+ तमोनिष्ठा, रजः(स्)सत्त्व+ तमोजुषः

**इष्ट्वेह देवता यज्ञैर्- गत्वा रं(म्)स्यामहे दिवि ।**

**तस्यान्त इह भूयास्म, महाशाला महाकुलाः ॥ 33॥**

एवं(म्) पुष्पितया वाचा, व्याक्षिप्तमनसां(न्) नृणाम् ।
मानिनां(ञ्) चातिस्तब्धानां(म्), मद्वार्तापि न रोचते ॥ 34॥

व्याक्षिप्+ तमनसां(न्),चातिस्+ तब्धानां(म्)

वेदा ब्रह्मात्मविषयास्- त्रिकाण्डविषया इमे ।
परोक्षवादा ऋषयः(फ्), परोक्षं(म्) मम च प्रियम् ॥ 35॥

ब्रह्मात्+ मविषयास्

शब्दब्रह्म सुदुर्बोधं(म्), प्राणेन्द्रियमनोमयम् ।
अनन्तपारं(ङ्) गम्भीरं(न्), दुर्विगाह्यं(म्) समुद्रवत् ॥ 36॥

प्राणेन्द्रिय+ मनो+ मयम्

मयोपबृं(म्)हितं(म्) भूम्ना, ब्रह्मणानन्तशक्तिना ।
भूतेषु घोषरूपेण, बिसेषूर्णेव लक्ष्यते ॥ 37॥

मयो+ पबृं(म्)+ हितं(म्),

ब्रह्मणा+ नन्त+ शक्तिना

यथोर्णनाभिर्हृदया- दूर्णामुद्वमते मुखात् ।
आकाशाद् घोषवान् प्राणो, मनसा स्पर्शरूपिणा ॥ 38॥

यथोर्+ णनाभिर्+ हृदया,दूर्णा+ मुद्+ वमते

छन्दोमयोऽमृतमयः(स्), सहस्रपदवीं(म्) प्रभुः।
ओं(ङ्)काराद् व्यं(ञ्)जितस्पर्शस्- वरोष्मान्तः(स्)स्थभूषिताम् ॥ 39॥

छन्दोमयोऽ+ मृतमयः(स्),व्यं(ञ्)जितस्+ पर्शस्

विचित्रभाषाविततां(ञ्), छन्दोभिश्चतुरुत्तरैः ।
अनन्तपारां(म्) बृहतीं(म्), सृजत्याक्षिपते स्वयम् ॥ 40॥

विचित्र+ भाषा+ विततां(ञ्),

छन्दोभिश्+ चतुरुत्+ तरैः, सृजत्या+ क्षिपते

गायत्र्युष्णिगनुष्टुप् च, बृहती पङ्क्तिरेव च ।

त्रिष्टुब्जगत्यतिच्छन्दो, ह्यत्यष्ट्यतिजगद् विराट् ॥ 41॥

गायत्र्युष्+ णिगनुष्+ टुप् ,त्रिष्टुब्+ जगत्+ यतिच्+ छन्दो

ह्यत्यष्+ ट्यति+ जगद्

किं(वँ) विधत्ते किमाचष्टे, किमनूद्य विकल्पयेत् ।

इत्यस्या हृदयं(लँ) लोके, नान्यो मद् वेद कश्चन ॥ 42॥

मां(वँ) विधत्तेऽभिधत्ते मां(वँ), विकल्प्यापोह्यते त्वहम् ।

एतावान् सर्ववेदार्थः(श्), शब्द आस्थाय मां(म्) भिदाम् ।

मायामात्रमनूद्यान्ते, प्रतिषिध्य प्रसीदति ॥ 43॥

विकल्प्या+ पोह्यते, मायामात्र+ मनू+ द्यान्ते

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)

सं(म्)हितायामेकादशस्कन्धे एकविं(म्)शोऽध्यायः ॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

